# संस्कृत वार्ताः

**दिनाङ्क :- 21.08.2026** **प्रात: - 06:55**

**अथवार्ताः**

**प्रधानमन्त्री सचिवाः**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः स्वनिवासे भारतसर्वकारस्य सचिवैः सह तृतीय-उच्च-स्तरीय-उपवेशनस्य अध्यक्षता कृता तथा च आधारभूतसंरचना, सम्पर्कं, सुरक्षा, विदेशकार्यं तथा शासनं इत्येतैः सम्बद्धानां मन्त्रालयानां विभागानां च भावीकार्यसूच्यां चर्चापिकृता। सः सचिवान्, देशस्य भविष्यं कथं भवितव्यं इति दीर्घकालिक दृष्टिकोणेन चिन्तयितुं उद्बुद्धवान्। अधिकान्तरसक्रियता तथा दत्तांशस्य प्रभावीप्रयोगस्य आह्वानम् कुर्वन्, श्रीमोदी अवदत् यत् दत्तांशः राष्ट्रियसम्पत्तिः भविष्यस्य संसाधनं च अस्ति। सः देशस्य रक्षा-उद्यमं सुदृढीकरणस्य आवश्यकतायाः विषये अपि अवधानं दत्तवान्, तथा च वैश्विकस्तरे अधिकप्रतिस्पर्धात्मकं कार्यंच कर्तुं प्रैरयत्। सभायां, सचिवाः क्षेत्रीयप्राथमिकतासु, उदयोन्मुखप्रतिसन्धिषु, कार्यान्वयनविषयेषु च स्वानुभवान् विनिमयी कृतवन्तः। मन्त्रिपरिषदीय-सचिवः, प्रमुख-मन्त्रालयानां विभागानां च सचिवाः, प्रधानमन्त्री-कार्यालयस्य वरिष्ठ-अधिकारिणः च अस्यां सभायां उपस्थिताः आसन्।

**प्रधानमन्त्री जापान**

भारतस्य आधिकारिकयात्रायाम् आगतः जापान्-देशस्य रक्षामन्त्री शिन्जिरो कोइज़ुमी, ह्यः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मेलनं कृतवान्। भारत-जापान्-देशयोः मध्ये विशेष-सामरिक-वैश्विक-सहभागित्वं सुदृढीकरणाय स्व-स्व दृष्टिकोणस्य आदानप्रदानम् कृतवन्तौ भारत-प्रशान्तक्षेत्रे तथा च बहिः शान्तिः, स्थिरता, समृद्धिः च वर्धयितुं भारत-जापान्-रक्षा-सुरक्षा-सहकारस्य महत्त्वम् अधोरेखितवन्तौ। श्रीमोदिना रक्षाक्षेत्रे, विशेषतः 'मेक् इन् इण्डिया' इत्यस्य आश्रये सह-विकासस्य, सह-उत्पादनस्य च कृते, भारतीय-समवायैः, स्टार्ट्-अप् इत्येतैः च सह सहभागित्वं कर्तुं जापान्-देशस्य कृते अवसराः निरूपितम्। रक्षामंत्री कोइज़ुमी वर्यः द्वैपाक्षिकरक्षा-सहकारस्य प्रगतिविषये अवदत् यत् भारतेन सह सम्बन्धं सुदृढं कर्तुं जापान्-सर्वकारस्य निरन्तरप्रतिबद्धतां पुनः दृढीकृतवान्।

**ब्रिक्स्- पुणे**

भारतम् अद्य पुणे-नगरे द्वादशमं ब्रिक्स्-सम्प्रेषण-मन्त्रिणां सम्मेलनम् आयोजयिष्यति। अस्याः सभायाः अध्यक्षः केन्द्रीय-सञ्चार-मन्त्री ज्योतिरादित्यसिन्दिया-वर्यः भविष्यति। सभायां ब्रिक्स् सदस्यराष्ट्राणां सम्प्रेषण-मन्त्रिणः वरिष्ठप्रतिनिधयः च (आई. सी. टी.) इति सङ्गृह्य सूचना-सम्प्रेषण-प्रौद्योगिकीनां डिजिटलपरिवर्तनस्य, नवान्वेषणस्य, संरचनायाः च विषये सहकारं सुदृढं कर्तुं चर्चां करिष्यन्ति। अयं कार्यक्रमः ब्रिक्स् सदस्यराष्ट्राणां कृते उदयोन्मुखप्रौद्योगिकीनां, डिजिटल-सार्वजनिकसंरचनायाः,

साइबरसुरक्षायाः, क्षमता-निर्माणस्य, समावेशी-डिजिटल-सम्पर्कस्य च विषयेषु विचारानां आदानप्रदानाय मञ्चं प्रददाति।

**एन्. टी. ए.**

राष्ट्रिय-परीक्षण-संस्थया (एन्. टी. ए.) इत्यनेन उक्तं यत् तस्य 'आंसर-की-चैलेञ्ज' पद्धतिः सर्वेषां छात्राणां कृते निष्पक्षतया परिकल्पिता अस्ति, तथा च तस्य व्ययस्य विषये चिन्तां निराकृतम्। एन्. टी. ए. इत्यस्य आंसर-की-चैलेञ्ज इति एका ऑनलाइन इति आभासीय-प्रक्रिया अस्ति यत्र परीक्षार्थिनः (यथा जे. ई. ई. मेन्, एन्. ई. ई. टी., अथवा यू. जी. सी. एन्. ई. टी.) अस्थायी-आंसर-की इत्येतस्मिन् त्रुटयः अन्वेष्टुं शक्नुवन्ति।

**हाकी**

हाकीति-क्रीडायां भारतीय-महिला-दलम् अद्य एम्स्टेल्वीन्-नगरे एफ्. आई. एच्-विश्वचषक-क्रीडायाः द्वितीय-पूल-चरणस्य प्रथमायां स्पर्धायां नीदर्लैण्ड्स-देशेन सह स्पर्धिष्यति । भारतीयसमयानुसारं रात्रौ सार्द्ध नववादने क्रीडा आरभ्यते।

।। **इति वार्ताः**।।